# प्राचीना शिक्षापद्धतिः

बृहस्पतिमिश्रः*

mishrabrihaspati@gmail.com

***सारः***

*यथा पशुषु क्रियात्मकज्ञानानि जन्मना एव स्वभावतः भवन्ति तथा मनुष्ये न भवति। सः तु कालान्तरेण सर्वं अभ्यस्यति। परं च अत्र अपरः अपि भेदः वर्तते पशुमनुष्ययोर्मध्ये यत् सः मनुष्यः यत् कालान्तरेण निमित्तान्याधारीकृत्य अभ्यस्यति तत्र सीमा न भवति। यावदपि इच्छति सः तावत् अभ्यस्तुं शक्नोति। अर्थात् मनुष्यं यावदपि वयं शिक्षयामः तावत् सः गृहीतुं समर्थः भवति। इमं विषयम् अधिगत्य अस्माकम् ऋषयः तत्सम्बद्धग्रन्थान् बहून् रचयामासुः। तत्र ते एतादृशीं शिक्षां केन प्रकारेण दातुं शक्नुवन्ति इत्यस्मिन् विषये अवगमयितुमेव ऋषयः वेदम् आधारीकृत्य शिक्षाग्रन्थान् रचितवन्तः। इत्थं शिक्षापद्धत्याः सारभूतं तथ्यमेव अत्र सङ्क्षिप्तरूपेण उपस्थापितमस्ति॥*

अस्यां स्थावरजङ्गमात्मिकायां सृष्टौ जङ्गमेषु, मनुष्येषु, मनुष्येतरेषु बहुषु भेदेषु सत्सु अपि एकः महान् भेदः अस्ति यः अन्यान् सर्वान् भेदान् अतिशेते। सः अस्ति मनुष्ये नैसर्गिकरूपेण स्वभाविकज्ञानं न्यूनतमं भवति किन्तु मनुष्येतरेषु स्वाभाविकज्ञानम् एव अधिकं भवति। यथा यः जीवः यस्यां जात्याम् उत्पन्नो भवति तादृशानि ज्ञानानि स स्वभावत एव जानाति। यथा वानरस्य वृक्षारोहणं कूर्दनञ्च, मूषकस्य किमपि वस्तोः कर्त्तनज्ञानम्, मार्ज्जारस्य आखेटनम्, पक्षिणः नीडनिर्माणम् इत्यादि। यदा जीवः मनुष्यजात्यां शरीरं प्राप्नोति तदा स्वाभाविकज्ञानस्य अभाव एव भवति एकं स्तनपानं परित्यज्य। अन्यद् सर्वं ज्ञानं सः दृष्ट्वा अनुभूय च प्राप्नोति। मनोवैज्ञानिकैः एतादृशाः प्रयोगाः कृताः, प्रसङ्गा अपि प्राप्यन्ते यत् कदाचित् कमपि शिशुम् एकदा वृकाः नीतवन्तः ते तस्य मारणं न कृतवन्तः अपितु पालितवन्तः केषाञ्चन वर्षाणाम् अनन्तरं मनुष्यैः स शिशुः दृष्टः आनीतश्च, तदा सः शिशुः केवलं वृक इव शब्दायते स्म। एतां कथां कदाचित् सत्यरूपेण नापि मन्यामहे किन्तु एतावत्तु सत्यमेव अनुभूयते यत् शिशुः यादृशि वातावरणे तिष्ठति तादृशं ज्ञानमेव अधिगच्छति। एषा एव प्रकृतिः मनुष्यस्य यत् स्वाभाविकज्ञानं न्यूनतरं भवति किन्तु नैमित्तिकज्ञानम् अधिगन्तुं काचित् परासीमा नास्ति। अर्थात् मनुष्यं यदि उत्तमेन प्रकारेण यावत् अपि शिक्षयाम सर्वमपि सः गृहीतुं शक्नोति, अस्मिन् विषये सर्वेऽपि

* प्राध्यापकः, श्रीशक्ति-संस्कृत-महाविद्यालयः, नैनादेवी, बिलासपुरम्, हिमाचलम्

शिक्षाविदः जानन्ति। ऋषिभिरपि एतत् तथ्यं ज्ञातचरम् आसीत्। वेदाः एतान् विषयान् सर्वप्रथमं वर्णितवन्तः।[१]

शिक्षाशब्दः विद्याग्रहणार्थकधातोः[२] कृदन्तेन सिद्ध्यति। एतेन अर्थः अस्ति यत् – यतः विद्यायाः उपादानम् - ग्रहणं भवति सा शिक्षा। पुराकालात् शिक्षा नामकस्य एकस्य वेदाङ्गस्य नाम अपि अस्ति तच्च एकं शास्त्रं यस्मिन् वर्णानां उच्चारणादिप्रक्रियायाः ज्ञानम् वैज्ञानिकम् अध्ययनम् च क्रियते। एतस्य शास्त्रस्य ज्ञातारः विषयग्रन्थनिर्मातारः अनेके ऋषयः पुराकाले अभूवन्, तेषु वैयाकरणशिरोमणिः आचार्यपाणिनिः सुप्रसिद्धः। वेदानां एतद्विषयकग्रन्थाः प्रतिवेदं पृथग् पृथग् उच्चारणादिप्रक्रियायाः ज्ञानार्थं उपदिष्टाः ग्रन्थाः प्रातिशाख्यग्रन्थाः उच्यन्ते।

शिक्षाविद्ययोः भेदः – शिक्षा साधनं भवति विद्या साध्यं भवति अर्थात् शिक्षासाधनेन विद्याप्राप्तिः भवति। विद्यया दुःखनिर्वृत्तिः या अमृतत्वेन अभिधीयते।[३]

विद्या अपि द्विविधा परा अपरा चेति आत्मविदः वदन्ति।[४] द्वयोरपिविद्ययोः प्राप्तये साधनं शिक्षा उच्यते। एतस्याः प्रक्रियायाः क्रमं पद्धतिरूपेण स्वीकुर्वन्ति विज्ञाः। सा च प्रक्रिया द्विमुखी, त्रिमुखी, बहुमुखी च इति आधुनिकाः शिक्षाविदोऽपि स्वीकुर्वन्ति। द्विमुखी – इत्यत्र आचार्यः अन्तेवासी च भवतः।[५] त्रिमुखीप्रक्रियायाम् –आचार्यः,अन्तेवासी, प्रवचनं च। बहुमुखी प्रक्रियायाम् पाठ्यचर्या अपि स्वीक्रियते। तैत्तिरीयोपनिषदि – आचार्यः पूर्वरूपम्, अन्तेवासी उत्तररूपम्, विद्या सन्धिः, प्रवचनं सन्धानम् – इत्यधिविधम् इत्युक्तम्।

पाठ्यचर्चायां ग्रहणसाधनरूपेण पठनं श्रवणं द्वयमपि भवति एतस्य संकेतः ऋग्वेदे दृश्यते –[६]

विद्याधिगमप्रक्रियायां परिस्थितीनाम् अपि महत्त्वपूर्णं योगदानं भवति। अतः उत्तमा परिस्थितिः अध्ययनाय भवेत् इत्यत्र ऋषिभिः बहुसूक्ष्मचिन्तनं कृतम्। सर्वोत्तमा परिस्थितिः कस्यचित् मनुष्यस्य

---

१ शुक्लयजुर्वेदः ४०/११

२शिक्ष विद्योपादाने। धातुपाठः, भ्वादिगणः ६८९

३ विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ शुक्लयजुर्वेदः, काण्वशाखा ४०/११

४ द्वे विद्ये वेदितव्ये इति स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च॥ मुण्डकोपनिषत् १/४

५ आचार्यः पूर्वरूपम्, अन्तेवासी उत्तररूपम्॥ तैत्तिरीयोपनिषत् – शिक्षावल्ली ३-४

६ ओम् उत त्वः पश्यन्न ददर्श वाचम् उत त्वः शृण्वन्न शृणोत्येनाम्।

उतो त्वस्मै तन्वं विसस्रे जायेव पत्ये उशती सुवासा॥ऋग्वेदः १०/७१/४

कृते गर्भे भवति यत्र तेन यदपि यावत् अपेक्षितं तत् निरायासं निर्द्वन्द्वतया प्राप्यते। विद्याधिगमप्रक्रिया अर्थात् शिक्षार्थम् ऋषिभिः तस्याः एव परिस्थित्या उपमा कृता अथर्ववेदे ।[१]

शास्त्रार्थान् सम्यग् आचिन्वन् सदाचारं यः बोधयति सः आचार्यः इति निरुक्ते उक्तम् ।[२]

यः द्विजः शिष्यम् उपनयनसंस्कारयुतं कृत्वा तं वेदाध्ययनं कारयति सः आचार्यः इति मनुस्मृतौ आचार्यशब्देन परिभाष्यते ।[३] तत्रैव उक्तमस्ति यत्, यः केवलं वेदस्य एकदेशं वेदाङ्गानि वा पाठयति तदपि वृत्यर्थं सः उपाध्यायः उच्यते इति ।[४]

मनुस्मृतौ गुरोः विषये एवमुक्तमस्ति यत् यः गर्भादानादारभ्य अन्त्येष्टिपर्यन्तस्य संस्कारान् यथाविधि कारयति सः गुरुः इति ।[५]एतेषां सम्मानादि व्यवस्थाविषयेऽपि मनुना निर्दिष्टम्।[६]

किन्तु ये आचार्योपाध्यायादयः स्वदायित्वं न वहन्तः केवलं जीविकायै अध्यापयन्ति ते द्विजाः सन्तः अपि वणिजायन्ते इति महाकविकालिदासः निन्दति ।[७]

अध्येता शिष्यरूपेण कीदृशः भवेत् इत्यत्र तु शब्दः एव प्रमाणीभूतः – शिष्यः = शासितुं योग्यः। शासितुं योग्य एव अन्तेवासी भवितुमर्हति। निरुक्ते अलंकाररूपेण उक्तम् – कदाचित् विद्या वेदस्य अध्येतुः ब्राह्मणस्य निकटमागत्य उक्तवती अहं भवतः निधिरस्मि, मम उत्तमैः प्रयासैः रक्षा करणीया। एवमुक्त्वा कस्मै विद्या देया कस्मै न देया इत्यर्थं निरुक्तकारेण यास्केन ततोऽपि प्राचीनानां उद्धरणं[८] लिखितम् ।[९]

---

[१] आचार्य उपनयनमानो ब्रह्मचारिणं कृणुते गर्भमन्तः॥ अथर्ववेदः ११/५/१

[२] ग्राहयति आचारं, आचिनोति अर्थान्, आचिनोति बुद्धिमिति वा । निरुक्तम् १/२

[३] उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः।
संकल्पं सरहस्यञ्च तमाचार्यः प्रचक्षते।मनुस्मृतिः २/१४०

[४] एकदेशं तु वेदस्यं वेदाङ्गान्यपि वा पुनः।
योऽध्यापयति वृत्यर्थम् उपाध्यायः स उच्यते॥मनुस्मृतिः २/१४१

[५] निषेकादीनि कर्माणि यः करोति यथाविधिः।
सम्भावयति चान्नेन स विप्रो गुरु उच्यते॥ मनुस्मृतिः २/१४२

[६] धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि न तद्विधा।
तत्र विद्या न वक्तव्या शुभं बीजमिवोसरे॥मनुस्मृतिः २/११२

[७] लब्धास्पदोऽस्मीति विवादभीरोस्तितीक्षमास्य परेण निन्दाम्।
यस्यागमः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति॥मालविकाग्निमित्रम् १/१७

[८] निरुक्तम् १/२ (निरुक्तभाष्यम्, भगवद्दत्तविद्यालङ्कारः)

[९] विद्या ह वै ब्राह्मणमाजगाम निरुक्तम् १/२

अन्तेवासिनां कृतेऽपि नियमाः निर्दिष्टाः प्राचीनैः। शिष्यः अध्ययनकाले पञ्चेन्द्रियाणि बुद्धिमनसी च संयम्य मनसा प्राञ्जलः सन् गुर्वैकदृष्टिमान् भवेत्।[१] गुरोः अभिमुखम् उपविशेत् ।[२] गुरुसन्निधौ शिष्यस्य आसनं शय्या वा नीचैः भवेत् ।[३] गुरोः निन्दां उपहासं वा न शृणुयात्। अनुक्षणं कर्णौ पिधातव्यौ अथवा ततः स्थानान्तरं गन्तव्यम् ।[४]

आर्चायोऽपि तादृशेभ्यः शिष्येभ्यः समानतया विद्यां वितरति इति उत्तररामचरिते उक्तम्।[५] पुनश्च बोधनाय उपायरूपेण स्नेहयुक्तं तर्जनताडनमपि समर्थ्यते महाभारते।[६]

इत्थं प्राप्ता विद्या मननादिभिः साधनैः स्वमेधया सब्रह्मचारिभ्यः च वर्धनीया भवति इति व्यासः महाभारते उद्योगपर्वणि भणति ।[७]

एवमेव एका प्रक्रिया महाभाष्येऽपि प्राप्यते[८] यत्र चतुर्भिः प्रकारैः विद्यायाः प्राप्तिः उपयोगश्च वर्णितः ।

एवं प्राचीनायां शिक्षापद्धतौ गुरुशिष्यौ मुख्यघटकौ स्तः। तयोः **भावात्मकव्यवहारः एव गुरुकुलशिक्षापद्धतौ आत्मतत्त्वम्** इति तत्त्वविदां तत्त्वनिश्चयः कथयितुं शक्यते।

## सन्दर्भसूची –


१.सिंह,डॉ.कुवँर चन्द्रप्रकाश(अनु.)1992,**शुक्लयजुर्वेदः**(ऋषि वायु विरचित) ,
भुवनवाणी ट्रस्ट, सीतापुर रोड, लखनऊ , २०, उ. प्र.,भारत

२.1981,**धातुपाठः** ,
रामलालकपूर ट्रस्ट, बहालगढ़, सोनीपत,हरियाणा,भारत

३. शास्त्री,प.जगदीशः(स.)1984, **उपनिषद्संग्रहः-मुण्डकोपनिषत्,**


---

१ शरीरं चैव वाचं च बुद्धीन्द्रियमनांसि च । नियम्य प्राञ्जलिस्तिष्ठेत् वीक्ष्यमाणो गुरोर्मुखम् ॥ मनुस्मृतिः २/१९२

२ आस्यामिति चोक्ते सन्नीताभिमुखं गुरोः । मनुस्मृतिः २/१९३

३ नीचं शय्यासनं चास्य सर्वदा गुरुसन्निधौ । मनुस्मृतिः २/१९८

४ गुरोः यत्र परीवादो निन्दा वापि प्रवर्तते। कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोन्यतः ॥ मनुस्मृतिः २/२००

५ वितरति गुरुः प्राज्ञे विद्यां यथा तथैव जडे । न खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ॥ उत्तररामचरितम् २/४

६ मृतैः पाणिभिः गुरवो न विषोक्षितैः।
लालनाश्रयिणो दोषाः ताडनाश्रयिणो गुणाः॥ महाभारतम् ८/१/८

७ आचार्यात् पादमादत्ते पादं शिष्यस्स्वमेधया ।
पादं सब्रह्मचारिभ्यः शिष्टं कालक्रमेण च ॥ महाभारतम्, उद्योगपर्व

८ चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति ,आगमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेनेति॥
महाभाष्यम्,पस्पशाह्निकम्

मोतीलाल बनारसीदास, बंग्लो रोड, जवाहरनगर, दिल्ली ,भारत
४. शास्त्री,प.जगदीशः(स.)1984, **उपनिषद्संग्रहः-तैत्तिरीयोपनिषत्,**
मोतीलाल बनारसीदास, बंग्लो रोड, जवाहरनगर, दिल्ली,भारत
५. सिंह,डॉ०कुवँर चन्द्रप्रकाश(अनु.)1992, **ऋग्वेदः** (ऋषि अग्नि विरचित),
भुवनवाणी ट्रस्ट,सीतापुर रोड, लखनऊ ,२० , उ. प्र.,भारत
६. 2045वि०, **महाभारतम्,**
गीताप्रेस, गोरखपुर, उ. प्र.,भारत
७. सिंह,डॉ०कुवँर चन्द्रप्रकाश(अनु.)1992 **अथर्ववेदः (**ऋषि अथर्वा विरचित**),**
भुवनवाणी ट्रस्ट,सीतापुर रोड, लखनऊ , २०, उ. प्र.,भारत
८. नेने,श्रीगोपालशास्त्री-**(**स.**)**२०३९वि०, **मनुस्मृतिः**(मनु विरचित),
चौखम्बा संस्कृत संस्थान,गोपाल मन्दिर लेन, वाराणसी , उ. प्र.,भारत
९. विद्यासागरः,प.छज्जूरामशास्त्री(टी.), पु. मु.1987, **निरुक्तम्(**ऋषियास्क विरचित),
मोहनचन्द लक्ष्मणदास पब्लिकेशन्स, नई दिल्ली,भारत
१०. शुक्लः,स्व.ब्रह्मानन्दः(टी.),पु. मु. 2000, **उत्तररामचरितम् (भवभूति विरचित),**
साहित्यभण्डार, सुभाष बाजार, मेरठ, उ. प्र.,भारत
११. विद्यालङ्कारः, भगवद्दत्तः,( व्या.)1981, **निरुक्तभाष्यम्,** (ऋषियास्क विरचित),
रामलालकपूर ट्रस्ट, बहालगढ़, सोनीपत , हरियाणा,भारत
१२. शास्त्री,चारुदेव(अनु.)पु.मु.1995,**महाभाष्यम्** (ऋषि पतञ्जलि विरचित),
मोतीलाल बनारसीदास ,बंग्लो रोड,जवाहरनगर, दिल्ली,भारत
१३.मिश्रः,प.रामचन्द्र (व्या.)पु.मु.1976,**मालविकाग्निमित्रम्** (कालिदास विरचित),
चौखम्बा अमरभारती प्रकाशन, गोपाल मन्दिर लेन, वाराणसी।